# Paramarthastutih

# પરમાર્થસ્તુતિઃ

## Document Information

Text title : paramArthastutiH

File name : paramArthastutiH.itx

Category : vishhnu, vedAnta-deshika

Location : doc_vishhnu

Author : vedAntadeshika

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : December 24, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 24, 2022

*sanskritdocuments.org*

# પરમાર્થસ્તુતિઃ

વેદાન્તદેશિકકૃતા ।

(ગૃધ્રસરસિ)

શ્રીમદ્ગૃધ્રસરસ્તીરપારિજાતમુપાસ્મહે ।
યત્ર તુઙ્ગૈરતુઙ્ગૈશ્ચ પ્રણતૈર્ગૃહ્યતે ફલમ્ ॥ ૧॥

ગુરુભિસ્ત્વદનન્યસર્વભાવૈઃ ગુણસિન્ધૌ કૃતસમ્પ્લવસ્ત્વદીયે ।
રણપુઙ્ગવ વન્દિભાવમિચ્છન્ અહમસ્મ્યેકમનુગ્રહાસ્પદં તે ॥ ૨॥

ભુવનાશ્રય ભૂષણાસ્ત્રવર્ગં મનસિ ત્વન્મયતાં મમાતનોતુ ।
વપુરાહવપુઙ્ગવ ત્વદીયં મહિષીણામનિમેષદર્શનીયમ્ ॥ ૩॥

અભિરક્ષિતુમગ્રતઃ સ્થિતં ત્વાં પ્રણવે પાર્થરથે ચ ભાવયન્તઃ ।
અહિતપ્રશમૈરયત્નલભ્યૈઃ કથયન્ત્યાહવપુઙ્ગવં ગુણજ્ઞાઃ ॥ ૪॥

કમલા નિરપાયધર્મપત્ની કરુણાદ્યાઃ સ્વયમૃત્વિજો ગુણાસ્તે ।
અવનં શ્રયતામહીનમાદ્યં સ ચ ધર્મસ્ત્વદનન્યસેવનીયઃ ॥ ૫॥

કૃપણાઃ સુધિયઃ કૃપાસહાયં શરણં ત્વાં રણપુઙ્ગવ પ્રપન્નાઃ ।
અપવર્ગનયાદનન્યભાવાઃ વરિવસ્યારસમેકમાદ્રિયન્તે ॥ ૬॥

અવધીર્ય ચતુર્વિધં પુમર્થં ભવદર્થે વિનિયુક્તજીવિતઃ સન્ ।
લભતે ભવતઃ ફલાનિ જન્તુઃ નિખિલાન્યત્ર નિદર્શનં જટાયુઃ ॥ ૭॥

શરણાગતરક્ષણવ્રતી માં ન વિહાતું રણપુઙ્ગવાર્હસિ ત્વમ્ ।
વિદિતં ભુવને વિભીષણો વા યદિ વા રાવણ ઇત્યુદીરિતં તે ॥ ૮॥

ભુજગેન્દ્રગરુત્મદાદિલભ્યૈસ્ત્વદનુજ્ઞાનુભવપ્રવાહભેદૈઃ ।
સ્વપદે રણપુઙ્ગવ સ્વયં માં પરિચર્યાવિભવૈઃ પરિષ્ક્રિયેથાઃ ॥ ૯॥

વિમલાશયવેઙ્કટેશજન્મા રમણીયા રણપુઙ્ગવપ્રસાદાત્ ।
અનસૂયુભિરાદરેણ ભાવ્યા પરમાર્થસ્તુતિરન્વહં પ્રપન્નૈઃ ॥ ૧૦॥

ઇતિ વેદાન્તદેશિકકૃતા પરમાર્થસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*Paramarthastutih*

pdf was typeset on December 24, 2022

Please send corrections to *sanskrit@cheerful.com*